# श्रीसुरसरस्वतीसभा शृङ्गेरि

## तुरीया परीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 02-02-2025 अङ्काः - 100

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1 पञ्चानाम् एकवाक्येन उत्तरं लिखत । 5**

१. रुमण्वान् कस्य पुत्रः ? रुमण्वतः पिता कस्य सेनापतिः आसीत् ?

२. आदिकविः कः ?

३. रघुणा कृतस्य अध्वरस्य नाम किम् ?

४. शिवगुरोः स्वप्ने कः आगतः ?

५. भारतसङ्ग्रहपाठे भारद्वाजः कः ?

६. कौशाम्बी कुत्र अस्ति ?

७. उदयनस्य जातकर्मादीन् कः चकार ?

८. नलः कं जग्राह ?

**2 पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत । 10**

१. स्वयंवरार्थम् आगच्छन्तं नलं दृष्ट्वा देवाः तं किमवोचन् ?

२. शतानीकः कः ? तं देवेन्द्रः कुतः आमन्त्रयामास ?

३. धार्तराष्ट्रः दुर्योधनः कञ्चित् पुरुषं रहसि किम् अभाषत ?

४. गिरिः गुरुसेवां कथं विदधौ ?

५. द्रुपदं दृष्ट्वा द्रोणः किमाह ?

६. भगवतः विभूतिः कीदृशी ?

७. ‘मा भूत्परीवादनवावतारः’ कीदृशः सः परीवादः ?

**3 द्वयोः विस्तरेण (सप्ताष्टैर्वाक्यैः) उत्तरं लिखत ।** **8**

१. खाण्डववनदहनवृत्तान्तं विवृणुत ।

२. इन्द्राग्नियमवरुणैः नलाय कति वराः दत्ताः ? के ते वराः ?

३. उदयनस्य औदार्यं वर्णयत ।

४. कुन्त्या पृष्टः द्विजः स्वपरिदेवननिदानं किमाह ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. प्रासोष्टातिमहसं सुखेन सूनुम् ।

२. स्त्रीणां निसर्गसिद्धा हि निपुणता ।

३. कोटीश्चतस्रो दश चाहरेति ।

४. हिंस्रस्य दमनाय हि राज्ञां शस्त्रं न तु कृपणजनक्लेशाय ।

५. रराज चन्द्रः परिपूर्णशृङ्गः ।

**5 द्वयोः भावं विशदयत ।** **8**

१. पुत्रांस्ते बहुवयसो बहून् किमज्ञान् एकं वा लघुवयसं ददामि सूनुम् ।
सर्वज्ञं तमिति शिवेन पृच्छ्यमानस्त्वस्त्वेकः सकलविदित्युवाच विप्रः ॥

२. अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥

३. शिलातलं प्राप्य यथा मृगेन्द्रो महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्रस्तथा प्रकाशो विरराज चन्द्रः ॥

४. अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥

**6 श्लोकमेकं पूर्णं लिखत ।** **4**

१. यद्धात्रा .................. जलम् ॥

२. एते .................. जानीमहे ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत । 4**

१. वाल्मीकिः　　२. लक्ष्मणसूरिः

**8 एकस्य लघुटिप्पणीं लिखत । 4**

१. शङ्कराचार्याणां शिष्यवात्सल्यम्　　२. पाण्डुः

**9 चत्वारि पदानि वाक्ये योजयत । 4**

१. पयोनिधिः　　२. अनुग्रहात्　　३. मुहुः
४. अवज्ञा　　५. तदनु　　६. सप्तार्चिः

**10 चतुर्णां रूपाणि विवेचयत ।** 4

१. प्रस्थाय　　२. गिरिनामा　　३. धनुषा
४. बभूव　　५. विद्योतते　　६. धीः

**11 चतुर्णां पर्यायपदानि लिखत । 4**

१. कुलीरः　　२. रुषा　　३. मित्रम्
४. अञ्जसा　　५. निर्वृतिः　　६. आदाय

**12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत । 4**

१. निद्रालस्ये　　२. दूतमुखात्　　३. पञ्चनली
४. रथिकाश्वरोहम्　　५. वर्त्मान्तरम्　　६. मदान्धः

**13 चतुर्णां सन्धिं विभज्य नाम लिखत । 4**

१. आगमैर्भिन्नाः　　२. तथेति　　३. यदृच्छयागतः
४ कस्मिंश्चिदहनि　　५. एतावदुक्त्वा　　६. पुत्रीञ्च

**14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6**

१. आह　　२. अभ्युत्सहे　　३. वर्तेथाः　　४. आसीत्

**15 द्वयोः व्याकरणविशेषं लिखत । 4**

१. अर्थ्याः　　२. नरकात् त्रायते　　३. श्रुतपारदृश्वा　　४. अन्तर्वत्नी

**16 समासमेकं सलक्षणं विशदयत ।** **4**

१. कर्मधारयसमासः २. बहुव्रीहिसमासः

**17 चतुर्थं पदं लिखत ।** **4**

| | | | | | | |
|---|---|---|---|---|---|---|
| १. | गुरुवंशकाव्यम् | – लक्ष्मणशास्त्री | :: | वैराग्यशतकम् | – | ________ |
| २. | वरतन्तुः | – कौत्सः | :: | द्रोणः | – | ________ |
| ३. | कौशाम्बी | – शतानीकः | :: | विदर्भः | – | ________ |
| ४. | हतशत्रुः | – बहुव्रीहिः | :: | षडङ्गम् | – | ________ |

**18 इतरवचनानि लिखत ।** **4**

| | | | |
|---|---|---|---|
| १. | _______ | _______ | उद्यमभृतः । |
| २. | अर्हसि | _______ | _______ । |
| ३. | _______ | निवासिनौ | _______ । |
| ४. | दुर्वासाः | _______ | _______ । |

**19 रिक्तस्थानानि पूरयत ।** **4**

१. ___________ नाम राजा यं पुण्यश्लोकम् इत्याहुः ।

२. अभ्युपपद्यस्वाधुनापि मम ___________ ।

३. किं वस्तु विद्वन् ___________ प्रदेयम् ।

४. शिष्टं सान्वशितवती दधार _________ ।

**20 प्रयोगपरिवर्तनं कुरुत ।** **2**

१. गिरिः गुरोः अक्षय्यकृपाकटाक्षवीक्षापात्रीभूतः आसीत् ।

२. पितरः कुतुकिनो भवन्ति ।

-------------------------